International Journal of Sanskrit Research 2020; 6(1): 214-217

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 214-217
© 2020 IJSR
www.anantaajournal.com
Received: 21-11-2019
Accepted: 25-12-2019

**जगबीर सिंह**
शोधार्थी, संस्कृतपालिप्राकृत विभाग, कुरुक्षेत्र-विश्वविद्यालयः, कुरुक्षेत्रम्, हरियाणा, भारत।

**डॉ॰ सुरेन्द्रमोहनमिश्र**
सहाचार्य, संस्कृतपालिप्राकृत विभाग, कुरुक्षेत्र, विश्वविद्यालयः, कुरुक्षेत्रम्, हरियाणा, भारत।

**Corresponding Author:**
**जगबीर सिंह**
शोधार्थी, संस्कृतपालिप्राकृत विभाग, कुरुक्षेत्र-विश्वविद्यालयः, कुरुक्षेत्रम्, हरियाणा, भारत।

# श्रीमद्भगवद्गीता-पातञ्जलयोग-ब्रह्मकुमारिसिद्धान्तानुगुणं जीवात्मपरमात्मनोः स्वरूपविवेचनम्

**जगबीर सिंह, डॉ॰ सुरेन्द्रमोहनमिश्र**

## प्रस्तावना

## भूमिका

मानवस्य मनसि उत्थितानां जीव-जगद्विषयकप्रश्नानां तर्कपूर्वकमुत्तरप्रदानमेव दर्शनस्य कार्यम् | वस्तुतः मानवचिन्तनविषयेषु प्रपञ्चमयब्रह्माण्डविषयकजिज्ञासा प्रमुखा आसीत् | अनन्तसुखस्य साधनं किं? दुःखानां नितान्तनाशरूपमोक्षस्य स्वरूपं किमित्यादयः प्रश्नाः मानवस्य हृदि भवन्त्येव | संसारं दुःखमयं तस्माद् तस्योपायः न केवलं संसारज्ञानेन शक्य अपितु जीवात्मपरमात्मनोः ज्ञानमप्यावश्यकं वर्तते | यथार्थज्ञानेनैव दुःखेभ्यः मुक्तिरिति प्रायः सर्वे दार्शनिकाः वदन्ति | योगपरम्परायां वैदिकहिरण्यगर्भनामकपिलादारभ्य अद्यावधिपर्यन्तं नानायोगशाखाः प्रस्फुटिताः | साधकैः स्वबुद्धिश्रध्दया तत्त्वामुपादानं कृतम् |

### श्रीमद्भगवद्गीतायामात्मनः स्वरूपम्

श्रीमद्भगवद्गीतायां आत्मनः स्वरूपनिरूपणं समीचीनतया कृतम्| गीतायामात्मा परमात्मनः भुवि अवतरितः अंशविशेषो वर्तते |[1] पंचदशे अध्याये श्रीकृष्णः कथयति यत् आत्मना सह मनसहितानि पञ्चज्ञानेन्द्रियाणि पूर्वशरीरं विहायापरं शरीरं प्रति तथैव गच्छति यथा वायुना सह गन्धः गच्छति| पुरुषः प्रकृतिसङ्गाद् प्रकृतिजान् गुणान् भुङ्क्ते |[2] वस्तुस्तु आत्मनि विकाराः न सन्ति |[3] अग्न्यादिपञ्चमहाभूतानां प्रभावो आत्मनि न भवति| आत्मा जीवात्मरूपेण विभिन्नानि शरीराणि धारयति | आत्मा पुरातनं शरीरं विहाय नूतनं शरीरं तथैव गृह्णाति यथा मानवः पुरातनवस्त्राणि त्यक्त्वा नूतनवस्त्राणि धारयति| त्रिगुणत्वात् सुखदुःखे प्रकृतावेव भवतः परञ्च आत्मा प्रकृतिजान् गुणान् भावान् वा आत्मन्यारोपयति |[4]

**श्रीमद्भगवद्गीतायां परमात्मसत्ता**

सम्पूर्णगीताशास्त्रमेव योगस्य प्रवचनं वर्तते | योगैकशब्दस्यतत्र विभिन्नसंदर्भदृष्ट्या निर्वचनं कृतम्| प्रत्येकमध्यायस्यान्ते पुष्पिकायां 'ब्रह्मविद्यायां योगशास्त्रे' इति प्राप्तपाठेन गीतोक्तयोगस्य विस्तारः ज्ञायते| भक्तियोगः,ज्ञानयोगः, ध्यानयोगः, राजयोगश्चानेके योगप्रकाराः तत्र विख्याताः सन्ति | तेषां सर्वेषामपि योगभेदानां समन्वयः तत्र दृश्यते | तस्मादेव भगवद्गीतोक्तयोगस्य व्यापकता अपरयोगापेक्षया विशालेति निश्चीयते| अनेन प्रकारेण सर्वजनहिताय सर्वजनसुखाय च गीताया अयमुपदेशः सार्वकालिकं सार्वभौमिकञ्च विद्यते | गीतायां परमात्मनः स्वरूपं विभुः वर्तते| सर्वभूतानि परमात्मनि तिष्ठन्ति |[5] परमात्मा कल्पादौ प्रकृतेः सृजनं करोति कल्पान्ते च सृष्टिं संहरति | अव्यक्तरूपेण परमात्मनः धाम निवासो वा द्युलोकादपि परम वर्तते |[6] ततः परमात्मा केवलं दुष्टान् संहर्तुं साधून् च रक्षितुमवतरति | परमात्मा कदापि न क्षरति न च विकारं प्राप्नोति | सर्वदा स्वभावे निर्लेपतया लोकातीतः भवति |[7] तस्य कर्म तु सृष्टेः निर्माणं वर्तते| परमात्मा पूर्वेषामपि गुरुः वर्तते| परमात्मनः अव्यक्तधाम्नि गताः जीवाः पुनर्न निवर्तन्ते अर्थात् तेषाम तत्रैव स्थितिर्जायते |[8] अतः परमात्मस्वरूपज्ञानाय मुमुक्षुसाधकेन तत् अव्यक्तपदं जिज्ञासितव्यं, तस्यान्वेषणं कर्तव्यं, तद्प्राप्तुं प्रयासः करणीयः | परमात्मा नाशशीलाद् संसारात् सर्वथा सर्वदा च भिन्न एव भवति | यः संसारं बिभर्ति, अव्यक्तश्च यः स एव परमात्मा कीर्त्यते |[9]

**पातञ्जलयोगे परमात्मनः स्वरूपविवेचनम्**

विवेकानन्दारविन्दादिचिन्तकैः पातञ्जलयोगस्य राजयोगत्वं स्वीकृतम् | राजयोगत्वेन स्वीकरणेऽष्टाङ्गयोगस्य क्रमपूर्वकं स्पष्टतया विवेचनञ्च कारणमस्ति | यमनियमादियोगसाधनानि सन्ति येषामनुष्ठानेन चित्तगतमलनाशः भवति तथा च साधकस्यात्मनि विवेकज्ञानस्य प्रकाशः जायते | पातञ्जलयोगे प्रतिपादितं वर्तते यत् समाधिसिद्धेः अपरं साधनं ईश्वरकृपयापि वर्तते| भक्तिविशेषेणानुगृहीत ईश्वरः योगिनं संकल्पमात्रेणानुगृह्णाति |[10] ईश्वरस्य योगिनं समाधिलाभः भवति समाधिफलं च शीघ्रतमं संपादितं भवति | तत्र मनसि प्रश्नः जायते यत् प्रकृतिपुरुषव्यतिरिक्तः कोऽयमीश्वरनाम इति ? ईश्वरस्य स्वरूपं पतञ्जलिमुनि वर्णयति यत् क्लेशकर्मविपाकाशयैः सर्वदा विमुक्त एव ईश्वरनामधेयः |[11] पुरुषस्तु कैवल्यात् पूर्वं बन्धनेषु भवति अन्तिमे च मुक्तिं प्राप्नोति परञ्च ईश्वरस्तु सदैव मुक्तः सदैश्वरो वर्तते | ईश्वरे परमात्मनि वा सर्वज्ञतायाः बीजं विद्यते, तस्मिन् पुरुषस्यापेक्षया ज्ञानं, आनन्दः, ऐश्वर्यादिगुणाः अतिरेकेण विद्यन्ते |[12] अनादित्वादीश्वरः पूर्वेषामपि गुरूणामपि गुरुः वर्तते | सृष्टेः आदावन्ते च सत्तावान् समयातीतः परमैश्वर्यसंपन्नः परमात्मा वर्तते |

**ब्रह्मकुमारिसिद्धन्तेषु परमात्मशिवस्वरूपम्**

समाजे वयं पश्याम यत् ब्रह्मकुमार्यः श्वेतवस्त्रधारणपूर्वकं शान्तियुक्तजीवनं यापयन्ति | सात्त्विकभोजनादिसिद्धान्ताः ब्रह्मकुमारीणां जीवनपद्धतेः मूलाधाराः सन्ति | प्रातर्ब्रह्ममुहूर्ते जागरणं, परमात्मविषयकयोगाभ्यास अपि ताभिः प्रतिदिनं क्रियते | भोगप्रधानदृष्टेः कारणात् संपूर्णे विश्वे भयस्य वातावरणं जायते | आतङ्कवादः, अशान्तिः, दारिद्र्यं, आध्यात्मिकपतनञ्च सर्वत्र वर्धत एव | मानवसमाजस्यकल्याणाय, विश्वशान्तये, शिक्षायै, आत्मिकोत्थानाय च ब्रह्मकुमारिसंस्था शताधिकदेशेषु विभिन्नकार्याणि करोति| ब्रह्मकुमारिसिद्धन्तेषु परमात्मा सच्चिदानन्दस्वरूपो वर्तते | यद्यपि अत्र ईश्वरः निराकारो वर्तते तदपि तस्य ध्यानस्मृत्यर्थं ज्योतिबिण्दुस्वरूपपरमात्मेति एतासां ब्रह्मकुमारिणां मतमस्ति | गुणित्वेन तु परमात्माकालमूर्तिः, प्रेमसागरः, गुणनिधिः, मुक्तिदायकः, सुखदुःखादिभावभिन्नः, अज्ञानरूपान्धकारादुद्धर्ता, ब्रह्मादिभिः त्रिभि रूपैः जगतः निर्माणादिकार्यविधायकश्च वर्तते |




ईश्वरः चतुर्षु युगेषु जनान् पावनान् कर्तुं विविधरूपेषु अवतरति स्वकियान् दिव्यकर्तव्यान् करोति| व्यावहारिकस्वरूपे सूक्ष्माकारवानस्ति| अत्र ईश्वरस्य सूक्ष्माकारस्वीकृते सति ताभिः तर्कः दीयते यत् यदि परमात्मनः विभुत्वं स्याद् तर्हि कथं सर्वत्र शुभदायकशिवे सति अशुभं स्यात् तस्माद् तस्य परमशिवस्य सुक्ष्माकार एव स्वीकरणीयः |

तासां मते वर्तमानसमयेऽपि दादालेखराज इति नामधेयस्य शरीरमाधाय दिव्यज्ञानं प्रददन्नस्ति |

## निष्कर्ष

जीवात्मनः स्वरूप्ज्ञानान्तरमेव परमात्मनः प्राप्तिः दुखनिवृतिः वा शक्या वर्तते| श्रीमद्भगवद्गीतायां आत्मा तु परमात्मनः अन्शः एव| प्रकृति - सान्निध्येन आत्मा सुखदुःखादिविकारोपेतो भवति| ईश्वरध्यानेन तस्य शरणागतिप्राप्त्या च मोक्षावाप्तिः भवति| पातञ्जलयोगे आत्मा पुरुषो वा प्रकृतिसंवेदी भवति समाधौ च तान् प्रकृत्या जायमानान् विकारान् विहाय स्वरूपे तिष्ठति| परमेश्वरस्यानुकम्पया योगी कैवल्यमाप्नोति| ब्रह्मकुमारिसिद्धान्तेषु जीवात्मा कल्पस्यादौ विश्वनाटकचक्रे आगच्छति| तत्रायमात्मा शक्तित्रयेन अष्टगुणैश्च सह यदात्मानं शरीराद् भिन्नो□हमित्यनुभवति परमात्मानं शिवं च ध्यायति तदा तस्य ज्योतिबिन्दुस्वरूपप्रकाशो वर्धते| अव्यक्तधामनिवासी परमशिवसान्निध्यवान् च स आत्मा भवति

## संदर्भ


1. ममैवान्शो जीवलोके जीवभूतः सनातनः| मनःषष्ठानीनिद्रियाणि प्रकृतिस्थानि कर्षति|| गीता,१५.७
2. पुरुषः प्रकृस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्| कारणं गुणसङ्गो□स्य सदसद्योनिजन्मसु|| गीता,१३.२१
3. प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि| विकारान्श्च गुनान्श्चैव विद्धिः प्रकृतिसंभवान्| गीता,१३.१९
4. कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते| पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते| गीता,१३.२०
5. नित्यः सर्वगतः स्थाणुरचालो□यं सनातनः| अव्यक्तो□यमचिन्त्यो□यमविकार्यो□यमुच्यते|| गीता,२.२४-२५
6. यथा□काशस्थितो नित्यं वायुः सर्वत्रगो महान्| तथा सर्वाणि भूतानि मत्स्थनीत्युपधारय|| गीता, ९.६
7. न तद् भासयते सूर्यो न शशाङ्को न पावकः| यद्गत्वा न निवर्तन्ते तद्धाम परमं मम|| वही, १५.६
8. अक्षरं ब्रह्म परमं स्वभावो□ध्यात्मुच्यते| भूतभावोद्भवकरो विसर्गःकर्मसंज्ञितः|| वही,८.३
9. ततः पदं तत्परिमार्गीतव्यं यस्मिन्गता न निवर्तन्ति भूयः| तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिःप्रसृता पुराणी|| वही,१५.४

10. क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते| उत्तमः पुरुषत्वन्य परमात्मेत्युदाहृतः|| वही, १५.१६-१७
11. तदाभावात् संयोगाभावो हानं, तदा दृशेः कैवल्यम्| पातञ्जलसूत्राणि,३.२५
12. क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः| वही,१.२४
13. तत्र निरतिशयं सर्वज्ञबीजं| वही, १. २५
14. सच्ची मन की गीता,पृ०सं०,४३
15. सहजराजयोग से दिव्य जीवन, पृ०सं०,१५